Pratnakīrti, Volume 5, Issue 2, 2024 ISSN: 2322-0694

# संस्कृतकाव्येषु लोकोक्तिप्रयोगः

मधुबाला शर्मा

विभागाध्यक्षः - साहित्यविभागः
ज॰ रा॰ रा॰राजस्थानसंस्कृतविश्वविद्यालयः जयपुरम् । (राजस्थान)

**सारांशः**

लोके प्रचलितव्यवहारस्याभिव्यक्तिः लोकोक्तिमाध्यमेन भवति। अत एव सामान्यजनजीवने प्रसारितसांसारिकक्रियाकलापस्य निष्कर्षरूपाः सन्ति लोकोक्तयः। मानवधियः सारभूतास्वेतासु लोकोक्तिषु ज्ञानस्य गूढं मर्म नीलिनं विद्यते। अस्मिन्सन्दर्भे लोकानुभूत्या अर्थगौरवः सूक्ष्मव्यावहारिकज्ञानं च दृष्टिपथमायाति। स्वल्पैः शब्दैः गम्भीरभावानां प्रकटनम् अर्थगौरवमिति कथ्यते। भारविकाव्ये अर्थगौरवस्य महिममण्डनम् अवलोक्य, साहित्यकाराः समीक्षकाश्च “भारवेरर्थगौरवम्” इति सहर्षम् उद्घोषितवन्तः। पुनश्च हिन्दीभाषायां “बिहारी सतसई” इत्यस्य गम्भीरभावनां निदर्शनविषये — ‘गागर में सागर भरना’ इत्युक्तिः प्रसिद्धा जाता। अतः लोकोक्तयः सूत्रप्रणाल्या अल्पशब्दैः गम्भीरार्थस्य प्रकाशिकाः सन्ति। लोकजीवनस्य यथार्थपक्षप्रकाशिकानां लोकोक्तीनामुपादेयता सांसारिकव्यवहारे प्रतिपदं द्रष्टव्या अस्ति। अत एव शास्त्राद् लोकव्यवहारोऽधिकः महत्त्वपूर्णः इत्यस्याशयभूतं कथनमिदं वर्तते — *“यद्यपि शुद्धं लोकविरुद्धं, नहि करणीयं नहि करणीयम्।”*

पौराणिकैतिहासिक - लौकिकानुभवैर्युक्ता मानवजीवनस्य प्रत्येकपक्षाधारिता लोके प्रचलिता सारगर्भिता उक्तिरेव लोकोक्तिनाम्नाऽभिधीयते। अस्याः प्रयोगः शिक्षाप्रदानाय क्रियते। संस्कृतसाहित्ये काव्यस्य समस्तासु विधासु सूक्तिरूपे लोकोक्तिप्रयोगो दृष्टिगोचरो भवति। रामायणमहाभारतयोः तु लोकोक्तिपरम्परा अवलोक्यत एव, सहैव भास-कालिदास--भारवि-माघ-शूद्रकादिप्राचीनसाहित्यकाराः तथा च रेवाप्रसादद्विवेदि-राधावल्लभत्रिपाठि-अभिराजराजेन्द्रमिश्र-मोहनलालपाण्डेय-ताराशंकरपाण्डेयप्रभृतिभिः अर्वाचीनसाहित्यकारैरपि स्व-स्वकाव्येषु यथास्थानं लोकोक्तिः समादृता समदृयते च।

पुरा सामान्यजनजीवने प्रचलितानां लोकोक्तीनां प्रयोगः संस्कृतभाषायां दृश्यते तत्पश्चात् तासां हिन्दीभाषायामपि प्रसारोऽभवत्। वाल्मीकिरामायणे वर्णितम् - *‘यदतीतं पुनर्नेति स्रोतः शीघ्रमपामिव’*[1] यथा नदीनां प्रवाहः पुनः न प्रत्यागच्छति तथैव विगतः कालः कदापि नैति। सरसदृष्टान्तयुक्तेनानेन कथनेन हिन्दीभाषायां *बीत गया सो बीत गया*, अथवा *रात गई बात गई* इति लोकोक्तिः प्रकटिता।

एवमेव यथोचितसमये कृतस्य कार्यस्य महत्त्वं विद्यते, निर्गते काले सम्पादितं कार्यं व्यर्थं भवति। विषयेऽस्मिन् रामायणे भणितिरस्ति - *‘गतोदके सेतुबन्धो न’*।[2] एवं भावार्थभूताया लोकोक्त्याः प्रयोगो हिन्दीभाषायां *अब पछताये होत क्या जब चिड़िया चुग गई खेत* अनेन प्रकारेण दृश्यते। अत एव विपत्त्याः पूर्वमेव समयानुसारं तासां निवारणमावश्यकं समस्यागमनानन्तरं

[1]वाल्मीकिरामायणम्, 5.20.12
[2]वाल्मीकिरामायणम्,, अयोध्याकाण्ड 9.54

Lalashankar Gayawal and Umesh Kumar Singh (Ed.) pp. 104-113
© Pratnakīrti Oriental Research Institute, Vārāṇasī, U.P., India
Recieved 14 August 2024, Revised 15 September 2024, Accepted 23 November 2024

This paper is available at https://www.pratnakirti.com/Home/Index

न। यथा कृषका: वृष्टिकालात् प्रागेव स्वगृहस्य छद्या दृढतया पुनर्निर्माणं कुर्वन्ति। अभिराजराजेन्द्रमिश्रेण प्रतिपादितं यत् - *मेघागमनात्प्रागेव कृषाणा: स्वकुटीरच्छदीं नवीकुर्वन्ति*[3] तथा च सम्बन्धेऽस्मिन् *निर्वाणदीपे किमु तैलदानम्* अथवा गतस्य शोचनं नास्ति इत्यपि उक्तिरस्ति।

लोकोक्तीनां प्रचलनं संस्कृतभाषायामभवत् तत्पश्चात् तासां सामान्यजनजीवने प्रसारो दृश्यते। यथा श्रीमद्भगवद्गीताया: प्रसिद्धश्लोके उक्तमस्ति यत् यो मरणासन्नो मनुष्य: मां विष्णुं स्मरति स: नर: मद्भावं अर्थात् वैष्णवतत्त्वं प्राप्नोति -

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम्।
य: प्रयाति स मद्भावं याति नास्त्यत्र संशय: ॥[4]

उक्तश्लोकानुसारं मरणान्तकालस्य विचारानुसारमेव मनुष्यस्य गतिर्भवति। एवमेव श्रीमद्भागवतोक्त- जडभरतवृत्तान्तेनापि ज्ञायते यत् मृत्युसमये यथा चिन्तनं चलति तदनुरूपं जन्म प्राप्नोति। जडभरत: मृत्युकाले स्वप्रियमृगविषये चिन्तनाद् मृगयोनिमवाप्नोत्। अतः सन्दर्भेऽस्मिन् *'अन्त मति सो गति'* लोकोक्ति: प्रचलिता जाता।

अस्या: लोकोक्त्या: प्रल्फुटनं ताराशंकरपाण्डेयस्याऽस्मिन् श्लोकेऽपि भवति -

अन्ते यास्ति मतिस्तथा मम गति: सम्भाव्य यातास्मि भो: !
गीताप्रोक्तवचोऽनुसारकरण: श्रुत्वाच्युतं केशवम्।
स्वात्मासून् परिमुच्य कृष्णशरणो जन्माष्टमीपर्वणि
सत्वौदार्यसमत्वबुद्धिविषयं सन्दिश्य: यात: क्वचिद् ॥[5]

जन्म-मरणे च निश्चिते यथा भगवद्गीतायां निगदितम् - *जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च*[6] एवं जन्म-मरणे तु सुनिश्चिते किन्तु स्वकर्मफलानुसारं कश्चिद् मनुष्य: सम्मानपूर्वकं मृत्युमवाप्य सिंहासनारूढो भूत्वा संसाराद् याति, अपर: दुर्जनश्च अपमानितं मृत्युं प्राप्नोति। विषयेऽस्मिन् हिन्द्यां लोकोक्ति: कथितास्ति --

आया है सो जायेगा राजा रंक फकीर।
कोई चढ़ सिंहासन कोई चढ़ जंजीर॥

एतस्या: रम्यं प्रतिपादनं पद्येऽस्मिन् अवलोकयितुं शक्यते ---

आयाता भुवि ये त्ववाप्य जननं यास्यन्त्यपि प्राणिन:
सर्वेऽत्रैव समाप्नुवन्ति मनुजा: कर्मानुसारं फलम्।
एको याति समादरेण जगतश्चारुह्य सिंहासनं
एको याति तिरस्कृतोऽखिलजनैर्बद्धश्च रज्वादिभि: ॥[7]

---

[3]पुनर्नवा- न्यासरक्षा
[4]श्रीमद्भगवद्गीता 8.5
[5]आत्मालाप:
[6]श्रीमद्भगवद्गीता 2.27
[7]अभिनवनीतिशतकम् 52

अधिकांशतया दृष्टिपथमायाति यत् नराः श्रेष्ठपुरुषाणां चरित्रस्यानुकरणं विदधति। प्रत्येकं क्षेत्रे जनाः श्रेष्ठानाम् आचार-विचारानुसारं कार्यं कृत्वा साफल्यमवाप्नुवन्ति। श्रीमद्भागवते भणितम् - *यद्यच्छीर्षचरितं तत्तदनुवर्तते लोकः*[8] तथा च - महाजनो येन गतः स पन्था इत्यनयोः वाक्ययोः सारांशभूता लोकोक्तिः - *बडों के नक्शे कदम पर चलना* इति हिन्दीभाषायां प्रथिताऽभवत्।

इत्थं प्रायः सर्वे मनुष्याः महापुरुषान् आदर्शस्वरूपं मन्यमानाः तेषां निर्दिष्टमार्गमनुसरन्ति किन्तु विशिष्टप्रतिभासम्पन्नाः मेधाविनः एकस्य मार्गस्यानुसरणं विहाय स्वशैल्यानुसारं कुशलतया कार्यं साधयन्ति साफल्यं च प्राप्नुवन्ति। सम्बन्धेऽस्मिन् लोककथनं प्रचलितम् -

लीक लीक गाड़ी चले लीक चले कपूत।
लीक छोड़ तीनो चलें शायर सिंह सपूत॥

लोकोक्तिरियं अभिराजराजेन्द्रमिश्रेण प्रकारान्तरेण प्रस्तुता -

पश्यन्तः पदचिन्हानि मूर्खा अग्रेसरन्ति च।
कवि-सिंह-सुपुत्राश्च स्वयमध्वप्रवर्तकाः॥[9]

कालिदासेन कथितम् -- *अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र*[10] शाकुन्तलनाटकस्येयमुक्तिः लोके *होनी होकर ही रहती है* अथवा *होनी को कोई नहीं टाल सकता* इत्यस्मिन् रूपे अतीव प्रख्याता विद्यते। नीतिशतके बहुविधनिदर्शनानां माध्यमेन भवितव्यताया अनिवार्यता निरूपिता यथा --

मज्जत्वम्भसि यातु मेरुशिखरं शत्रुञ्जित्वाऽऽहवे,
वाणिज्यं कृषिसेवने च सकला विद्याः कलाः शिक्षताम्।
आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परं
नाऽभाव्यं भवतीह, कर्मवशतो भाव्यस्य नाशः कुतः॥[11]

श्लोकस्यास्य निष्कर्षस्वरूपं लोककथनमिदं प्रथितम् --

अनहोनी होवे नहीं, होनी होवे सो होय।
तुलसी भरोसे राम के, निर्भय हो के सोय॥

प्रायः आपद्ग्रस्तः नरः अधिकमापदामाप्नोति, अस्य भावार्थयुक्ता लोकोक्तिः *फोड़े पर फोड़ा होना* इति वर्तते। कालिदासेन अभिज्ञानशाकुन्तलनाटके अस्याः लोकोक्त्याः प्रतिपादनमेवं प्रकारेण क्रियते - *गण्डस्योपरि पिण्डकः संवृत्तः*[12] इति।

---

[8]श्रीमद्भागवतम् 5.4.15
[9]अभिनवपञ्चतन्त्रम्, मित्रभेदः 4
[10]अभिज्ञानशाकुन्तलम् 1.14
[11]नीतिशतकम् 101
[12]अभिज्ञानशाकुन्तलम्, द्वितीयोऽङ्कः

पिता पुत्र्याः पालनं संरक्षणञ्चातीव प्रेम्णा करोति किन्तु विवाहस्य समयागते अन्यस्य कृते समर्पयति इत्येव संसारस्य रीतिः। अभिज्ञानशाकुन्तलनाटके नायिकायाः शकुन्तलायाः पतिगृहं प्रति प्रस्थानस्य मार्मिकावसरे पितृकण्वस्य हृदयगतभावानुभूत्याः वर्णनं विधाय कालिदासेन कथितम् - *"अर्थो हि कन्या परकीय एव"*[13] कालान्तरे उक्तिरियं लोके 'कन्या तो पराया धन होती है' कथनरूपे प्रथिता जाता।

कन्यायाः पिता न केवलं वरविषये अपितु यौतुकस्य कृतेऽपि चिन्तानिमग्नो भवति। समाजे बहुधा दृश्यते यत् पुत्र्याः विवाहे यौतुकमपि अवरोधमुत्पादयति। समाजे एतादृश्याः स्थित्याः कारणादपि पञ्चतन्त्रस्य इदं कथनम्- *कन्यापितृत्वं खलु नाम कष्टम्*[14] अद्यत्वे सम्यक् प्रतिभाति। विषयेऽस्मिन् हिन्द्यां- *'कन्या का पिता होना अत्यन्त कष्टकारी होता है'* इति लोकोक्तिः प्रचलिता।

विवाहो जीवनस्य महत्त्वपूर्णमङ्गं विद्यते। बाल्यकाले बालाः क्रीडायां पुत्तलिकाविवाहेनानन्दिता भवन्ति, यथार्थजीवने विवाहः क्रीडनं न अपितु आजन्म दृढसम्बन्धो वर्तते। आधुनिकसाहित्यकारेण अभिराजराजेन्द्रमिश्रेण "चञ्चा" नामिकायां स्वकथायां कथितम् - परिणयोऽयं न पुत्तलिकाक्रीडनम्। प्रसङ्गेऽस्मिन् *"विवाह गुड्डे गुड़ियों का खेल नहीं है"* इति लोकोक्तिरस्ति। विवाहानन्तरं नववधूनां कृते पुत्रप्राप्त्याः आशीर्वादः प्रदीयते। अस्या आशीर्वादस्वरूपायाः लोकोक्त्याः प्रयोगः अभिराजराजेन्द्रमिश्रेण *"स्नाहि दुग्धेन फलपुत्रेण"* अनेन प्रकारेण कृतः। हिन्द्यां - *दूधो नहाओ पूतो फलो* एवमस्ति।

*शठे शाठ्यं समाचरेद्* इति वर्णितम्। अस्याः सूक्तेः सन्दर्भेऽस्मिन् 'जैसे को तैसा' इति लोकोक्तिः प्रथिताऽभवत्। अस्याः लोकोक्त्याः भावपरिपूर्णा भणितिः पञ्चतन्त्रेऽपि वर्तते - *'कण्टकेनैव कण्टकम्'*[15] अर्थात् *काँटे से काँटा निकालता है* इति हिन्द्याम् उक्तिरस्ति। नैषधीयचरितमिति महाकाव्ये लोकोक्तिरियं परिवर्तितरूपेण पुष्टा जाता -

तेन तेन वचसैव मघोनः स स वेद कपटं पटुरुच्चैः ।
आचरतदुचितामथ वाणीमार्जवं हि कुटिलेषु न नीतिः ॥[16]

सर्वे जनाः परेषां चिन्तां विहाय स्वसुविधानुसारं आत्मकल्याणाय कार्यं कुर्वन्ति। महाकविमाघेन निगदितम् -

यजतां पाण्डवः स्वर्गमवत्विन्द्रस्तपत्विनः।
वयं हनाम द्विषतः सर्वः स्वार्थं समीहते॥[17]

युधिष्ठिरेण आयोज्यमाने राजसूययज्ञे इन्द्रप्रस्थं गमनीयं अथवा शिशुपालदमनाय यातव्यमिति कार्यद्वये किंकर्तव्यविमूढस्थितियुक्तस्य कृष्णस्य कृते बलरामः स्वाभिमतं प्रकटयति यत् शिशुपालवधाय गमनमधिकमुचितं यतो हि *सर्वः स्वार्थं समीहते*। कथनमिदं हिन्द्यां *सभी स्वार्थी होते हैं* इति लोकोक्तिरूपेण विख्यातं जातम्।

---

[13]अभिज्ञानशाकुन्तलम् 4.22
[14]पञ्चतन्त्रम्, मित्रभेदः 222
[15]पञ्चतन्त्रम्, लब्धप्रणाशः 19
[16]नैषधीयचरितम् 5.103
[17]शिशुपालवधम् 2.65

शिशुपालवधमिति महाकाव्ये समयस्य महत्ताविषये वर्णितं। प्रत्येकं क्षेत्रे कालप्रभावात् वस्तुनः प्रधानत्वं निर्धारितं। यथा वर्षाऋतौ मयूराणां वाणी रमणीया भवति, किन्तु शरदि हंसस्वरा आह्लादकाः। मयूराणां केका कर्कशा प्रतीयते, अत एवोच्यते समय एव करोति बलाबलम्।

समय एव करोति बलाबलं प्रणिगदन्त इतीव शरीरिणाम्।
शरदि हंसरवाः परुषीकृतस्वरमयूरमयूरमणीयताम्॥[18]

समय एव करोति बलाबलं सूक्तिरियं कालान्तरे *समय बड़ा बलवान* स्वरूपेण प्रसिद्धा। अत्र एवमप्युच्यते --

समय-समय की चाल है, समय-समय की बात।
कहीं समय पर दिन बड़ा तो कहीं समय पर रात॥

स्थानस्य प्राधान्यमवलोक्यते, स्वस्थाने तु कश्चिन्निर्बलोऽपि सबलो भवति। यथा महाकविशूद्रकेण मृच्छकटिके लिखितम् - *भोः! स्वके गेहे कुक्कुरोऽपि तावच्चण्डो भवति।*[19] कथनस्यास्य रूपान्तरणं हिन्दीभाषायां *"अपने घर में तो कुत्ता भी शेर होता है"* अस्यां लोकोक्त्यां दृश्यते।

कुक्कुरमधीकृत्य एका अन्याऽपि लोकोक्तिः *'धोबी का कुत्ता न घर का न घाट का'* इति श्रूयते। अभिराजराजेन्द्रमिश्रेण कथनमिदं संस्कृते - *निर्गृहघट्टो रजकसारमेय इव हिण्डते।*[20] एवमभिधीयते, अर्थात् यो जनः किमपि कार्यं न करोति व्यर्थमेव इतस्तत अटति तथा च यस्य सम्मानमपि कुत्रापि न भवेत् तस्य कृते उक्तिरियं प्रसिद्धा। अभिनवपञ्चतन्त्रे - *इतो भ्रष्टः ततो भ्रष्टः* इतिरूपेण भणितम्।

एकापरा सूक्तिरास्ते - जलेन पूर्णो घटो नैव शब्दं करोति न च जलं बहिः करोति। इत्यस्याभिप्रयोऽस्ति यत् अर्धजलपरिपूरिते घटे न ध्वनिर्भवति नैव च जलं बहिरायाति। तथैव प्राज्ञ आत्मश्लाघाडम्बररहितो भवति। परं यः अल्पज्ञो भूत्वाऽपि नैकप्रकारेण आडम्बरं प्रदर्शयति आत्मप्रशंसां च करोतीति। निष्कर्षरूपेण हिन्दीभाषायां लोककथनं विश्रुतम् - *अधजल गगरी छलकत जाय* इत्यस्य संस्कृते *अर्धजलो घटो बहुशः शब्दं करोति व्यर्थमेव*[21] अभिराजराजेन्द्रमिश्रेण प्रकारान्तरेण प्रतिपादितम्।

नैषधीयचरितमहाकाव्ये कथितम् - *'स्वाभाविकात् कृत्रिममन्यदेव'*।[22] अर्थात् प्राकृतिककृत्रिमयोः स्वाभाविकमन्तरं भवति। अस्य भावार्थयुक्ता "असली और नकली में अन्तर होता है" इति लोकोक्तिः वर्तते।

कर्मफलमवश्यमेव भोक्तव्यं यतो हि कर्मफलानुसारमेव भाग्यस्य निर्माणं भवति। श्रेष्ठकर्मणां प्रभावेण सुखसम्पदादिकं सुफलं प्राप्तुं शक्यते, एवमेव दुष्कर्मानुसारेण

---

[18]शिशुपालवधम् 6.44
[19]मृच्छकटिकम्, प्रथमोऽङ्कः
[20]अभिनवपञ्चतन्त्रम्, काकोलूकीयकम्
[21]तदेव
[22]नैषधीयचरितम् 10.19

कष्टानामनुभूतिर्जायते। अतः सर्वे मानवाः स्वकर्मानुसारमेव फलं लभन्ते। अभिप्रायोऽयं हिन्द्यामेवं कथ्यते - *सबको अपने-अपने कर्मों का फल भोगना पड़ता है।* सन्दर्भेऽस्मिन् *कर्म कः स्वकृतमत्र न भुङ्क्ते* इति लोकोक्तिर्निबद्धास्ति। नैषधीयचरिते अस्याशयभूतः श्लोकोऽयं विद्यते-

पर्यभूद्दिनमणिर्द्विजराजं यत्करैरहह ! तेन तदा तम्।
पर्यभूत् खलु करैर्द्विजराजः कर्म कः स्वकृतमत्र न भुङ्क्ते॥[23]

नरो यादृशं कर्म करोति तादृशं फलं प्राप्नोति इत्येव विधानं वर्तते। हिन्द्यामस्य कृते *जैसी करनी वैसी भरनी* अथवा *जो बोयेगा वही पायेगा* इत्यादयो लोकोक्तयः श्रूयन्ते। संस्कृते एतस्याः प्रयोगो दृष्टान्तेन निरूपितः -

करोति यो यद् वपनं लुनाति पापं निकृष्टं परदोषचर्चा।
दुर्वृत्तगेहे चिरभोजनस्य पापं हि निन्दावमनेन शाम्यते॥[24]

अस्मिन् प्रसङ्गे परिवर्तितप्रकारेण *'बोया पेड़ बबूल का तो आम कहाँ से होय'* एवमप्युच्यते।

कदाचिदिदमप्यवलोक्यते यदस्माकं विरुद्धं वर्तितं कार्यं भविष्ये अनुकूलं प्रतीयते। अस्य अनेकानि निदर्शनानि सन्ति - यत्र शापो वरदानरूपेण सिद्धः। यथा महाभारते अर्जुनस्य नपुंसकत्वस्य शापः अज्ञातवाससमये बृहंनलारूपे वेशपरिवर्तनाय वरदानस्वरूपेण फलीभूतः। अत एव कथ्यते — *भगवान् जो भी करते हैं अच्छे के लिए ही करते हैं* अथवा *जो भी होता है भले के लिए ही होता है।* लोकोक्तिरियं अधोलिखितश्लोके चित्रिता —

तत्पापशापो वरदानमेव वनेचराणां सुलभात्र सेवा।
करोति यद् यज्जगतो नियन्ता हिताय तत् तज्जगतो जनानाम्॥[25]

यदा बहुविपदागमनानन्तरमपि भगवत्कृपया कापि हानिः न जायते अस्य कृते *'बाल भी बाँका नहीं हुआ'* इति लोकवाक्यं ख्यातम्। *'रोमापि न वक्रमासीत्'*[26] — एवं प्रकारेण नृसिंहचम्पूकाव्ये अपि हिरण्यकशिपुना प्रह्लादाय प्रदत्तयातनाविषये अस्य लोककथनस्य प्रयोगो दृश्यते।

आपद्ग्रस्त मनुष्य एव परेषां पीडाया अनुभवं कर्तुं शक्नोति, परन्तु अन्ये जनास्तु परपीडामवलोक्य उपहासमेव कुर्वन्ति। विषयेऽस्मिन् श्लोकोऽयं मिलति —

विद्वानेव विजानाति विद्वज्जनपरिश्रमम्।
न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम्॥[27]

अस्याशयभूतेयमुक्तिः — *'जाके पैर न फटी बिवाई, सो क्या जाने पीर पराई।'* प्रसृता जाता।

---

[23]नैषधीयचरितम् 5.6
[24]श्रीगोतमेश्वरशतकम् 27
[25]गोमतेश्वरशतकम् 94
[26]नृसिंहचम्पूकाव्यम्, द्वितीयोच्छ्वासः
[27]कुवलयानन्दः, प्रतिवस्तूपमा, 62

लोकोक्तिप्रयोगसन्दर्भे मोहनलालशर्मपाण्डेयेनापि स्वकीये *रसकपूर* नामके उपन्यासे प्रसङ्गानुसारं नैकानां लोकोक्तीनां प्रयोगः कृतः। *"मुँह पर थूकना"* लोकोक्तिरुल्लिखितास्ति *रसकपूरस्य* प्रथमविरामे यथा—

*"साम्प्रतं केवलमिदमेवाहं वक्ष्यामि यदेका कुभागधेया कुनामधेया सामान्याङ्गना वर्ते — या हि जगता गणिका भणिता मुखोपरि निष्ठीवनप्रक्षेपणपुरस्सरं निर्भर्त्सिता।"*[28]

अतीव घृणितकार्यं अथवा घृणितमनुष्यं प्रति जुगुप्साऽभिव्यक्तये सम्बद्धजनस्याभिमुखे एव तस्य निन्दा प्रदर्श्यते। इत्यस्य कृते हिन्द्यां *"मुँह पर थूकना"* लोकोक्तिः प्रचलति।

स्वप्नसंसारे यथार्थजीवने च महदन्तरं वर्तते। स्वप्नानां सिद्धये प्रभूतस्य परिश्रमस्यावश्यकता भवति। तथा च स्त्रीणां कृते तु स्वप्नावलोकनस्य सीमाऽपि संकुचिता वर्तते, यतोहि तासां मर्यादा, दायित्वम्, अधिकाराश्च पुरुषेभ्यः भिन्नाः। अत एव जगति उक्तिरियं प्रसिद्धा — *"सपने भी कभी सच हुए हैं?"* *रसकपूरे* विषयोऽयं एवं वर्णितः — *"नारीणां निलयनिःसरणं सरलं परं पुनरावृत्य गृहावग्रहणीचरणनिक्षेपणं स्वप्नसदृशं वर्तते। न जायन्ते जातु स्वप्नाः सत्याः।"*[29]

अतीवदृढसम्बन्धस्य कृते *'चोली-दामन का साथ'* इति लोकोक्तिः विश्रुतास्ति। पं. मोहनलालशर्मपाण्डेयेन रसकपूरनामके उपन्यासे अस्याः लोकोक्त्याः प्रयोगं विधाय वर्णितं यत्— *"स्वान्तम्? न निवसति तस्मिन् व्यथातिरिक्तं किञ्चित्। हृदयव्यथयोर्भवति 'कुचकञ्चुक्योरिव सम्बन्धः।"*[30] शारीरिकसन्तापस्तु सोढुं शक्यते, किन्तु हृदयं कोमलं भवति, अतो हृदयव्रणस्य पीडा असह्या जायते, एवं हृदयेन साकं पीडायाः प्रगाढसम्बन्धो भवति। प्रचण्डयुद्धसन्दर्भे शत्रुताप्रदर्शने वा *'खून की नदियाँ बहना'* लोकोक्तिः प्रसृतास्ते। अस्याः सुन्दररीत्याः प्रतिपादनं 'शोणितसरित्सरणं' रूपेण मोहनलालपाण्डेयेन कृतम्। *रसकपूरे* कथितम्— *"अनुपममस्ति राजन्यकानां पुरावृत्तम्। स्वल्पेऽपि सञ्जाते प्रतीपोदन्ते शोणितसरित्सरणं सामान्येतिवृत्तं वरीवृत्यते।"*[31] अनेनैव प्रकारेण प्रतिष्ठाप्रसङ्गे "इज़्ज़त धूल में मिलना" इति लोकोक्तिः ख्याता वर्तते। अस्याः लोकोक्त्याः अतीवसम्यक्तया उल्लेखो विद्यते —

*धूलिसाद् भविष्यति मे प्रतिष्ठा। मन्वते पञ्चजनाः साम्प्रतं मद्भवनं पञ्चायतनं मां च प्रधानं पञ्चजनम्।*[32]

अभिराजराजेन्द्रमिश्रेण स्वलिखितेषु *राङ्गडा-चित्रपर्णी-पुनर्नवा* इतिनामकेषु कथासङ्कलनेषु हिन्दीभाषायां प्रसृताः नैकाः लोकोक्तयः प्रयुक्ताः। काश्चिद् दृष्टान्तस्वरूपाः अत्र प्रस्तूयन्ते यथा —

1. न रहेगा बाँस न बजेगी बाँसुरी — अविद्यमाने वेणुदण्डे वेणुरपि नोध्माष्यति।
2. तिल का ताड़ मत बनाओ — अलं तिलं तालीकृत्य।
3. जंगल में मोर नाचा किसने देखा — कान्तारे नर्तितो मयूरः केन दृष्टः।
4. तुम डाल-डाल हम पात-पात — प्रतिशाखं त्वं प्रतिपत्रं चाहम्।
5. बिल्ली के गले में घंटी कौन बाँधे — मार्जार्याः कण्ठे घण्टिकां को बध्नातु।

[28]रसकपूरम् 1-पृ.10
[29]रसकपूरम् - 2 पृ. 24
[30]रसकपूरम् - 3 पृ. 99
[31]रसकपूरम् - 11-पृ.157
[32]रसकपूरम् -12- पृ. 171

6. काम पड़े तो गधे को भी बाप कहना पड़ता है — स्वार्थं साधयितुं गर्दभमपि तातपादमाख्याहि।
7. थोथा चना बाजे घना — रिक्तं चणकं सान्द्रं नदति।
8. भाड़ में जाओ — भ्राष्ट्रमुखं गच्छ।

एवमेव ताराशंकरपाण्डेयेनापि स्वविभिन्नकाव्येषु प्रसङ्गानुसारं लोकोक्तयो गुम्फिताः। आश्चर्यस्य कृते अथवा विस्मयस्याभिव्यक्तये *'दाँतों तले उँगली दबाना'* इत्युक्तिर्विश्रुतास्ति। पाण्डेयः अधोलिखितश्लोके इमां लोकोक्तिं *'वदनदशनमङ्गुलीश्चर्वयन्ति'* रूपेण वर्णितवान्। अस्याः लोकोक्त्याः प्रयोगं विधाय श्लोकेऽस्मिन् चित्रितं यद् भारतीयवैज्ञानिकानामुपलब्धिं विलोक्य सर्वेऽपि वैश्विकजना आश्चर्यान्विताः सञ्जाताः।

क्षेत्रे वैज्ञानिकेऽथो खगतभगणने सांख्यिकीये च यन्त्रे
नासीये चान्द्रयाने प्रकृतिविरचिता नैपुणी भारतीयैः।
तन्मेधां भारतीयां विविधगतिमतीं वीक्ष्य वैज्ञानिकाश्च
विज्ञा मुग्धाः समस्ता वदनदशनमङ्गुलीश्चर्वयन्ति॥[33]

यदा विश्वस्त आत्मीयजन एव वञ्चयति तस्य कृते ''आस्तीन का साँप'' इति लोककथनं श्रूयते। ताराशंकरपाण्डेयेन कथनस्यास्य आशयभूता ''बाहूदरविष्टसर्पभुजगो'' भणितिरियं प्रयुक्ता। अस्या लोकोक्त्याः माध्यमेन प्रस्तुतपद्ये प्रतिपादितं यद् घनिष्ठो बान्धवोऽपि विश्वासघातं करोति —

. . . विश्वासं सततं गभीरमतुलं चोत्पाद्य सद्यो सतां
त्वं बाहूदरविष्टसर्पभुजगो विश्वासघाती मतः॥[34]

प्रो॰ पाण्डेयेन स्वकीयगज्जलिकायां उक्तलोकोक्त्याः प्रयोगः 'भुजभुजङ्ग' इति अपररूपेणापि कृतः। यथा —

मित्र! मधुरं दंशति नो भुजभुजङ्गः।
सत्यमुदितं भवति को भुजभुजङ्गः।[35]

शत्रुसमक्षे शौर्यं प्रदर्श्य तस्य पराभूतिकरणार्थे *'दाँत खट्टे करना'* इति लोककथनं वर्तते। भारतीयसेनायाः वीरताप्रदर्शनाय इत्युक्तिः प्रयुक्तास्ति प्रो॰ पाण्डेयेन त्रिरङ्गकाव्ये यथा —

वारम्वारं प्रयासैर्हिमगिरिशिखरे छद्मयुद्धं प्रकल्प्य
जातायां वैरशुद्धौ पुनरपि रिपुभिः क्रम्यते सीमरेखा।
. . . . . . . . . . . . . . . . . . . . . . . . . . . . .
दन्तानाम्लान् रिपूणामतिबलसुभटैर्यो विधत्ते त्रिरङ्गः॥[36]

---

[33]मुक्तक, ताराशंकर पाण्डेय
[34]मुक्तक, ताराशंकर पाण्डेय
[35]गज्जलिका, ताराशंकर पाण्डेय
[36]त्रिरङ्गकाव्यम्, ताराशंकर पाण्डेय

स्वभाग्यानुसारं मनुष्यः सुखं दुःखञ्चाप्नोति। समाजे सूक्तिरेवं प्रचलिता — *'भाग्य का लिखा कौन मिटा सकता है'*। नीतिशतके प्रकृत्याः बहुविधोदाहरणैरुक्तिरियं चित्रिता यत् — *'यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः'*। अस्मिन् प्रसङ्गे आशुकविना पं॰ रामस्वरूपदोतोलियावर्येण नृपस्य नलस्य, राज्ञ्याः दमयन्त्याश्च उदाहरणं प्रदाय एतद् लोककथनं प्रतिपादितं यत् नृपः नलः धर्मशीलः सामर्थ्यवांश्चास्ति, तथापि भाग्यवशाद् विपत्तिपारावारे निमग्नो जातः —

को जानाति नलं न यो नृपवरो धर्मिष्ठ आसीत् सदा
तद्राज्ञी दमयन्त्यपि व्रतपरा सत्कर्मशीला च या।
किन्त्वेतद् युगलं ममज्ज विपदां वारांनिधौ सर्वदा
तस्मादेव सुनिश्चितं विधिकृतं नैवास्ति तन्मार्जनम् ॥[37]

प्रो॰ ताराशंकरपाण्डेयेनापि स्वकीये *आत्मालाप* नामककाव्ये स्वनाम्नः तुलाराशिमधिकृत्य सूर्यस्य निदर्शनं प्रदाय लोकोक्तिरेषा प्रतिपादिता एवम् —

शायाह्नेऽपि पराक्रमारुणतया सूर्यस्तुलारोपितः
ताराभारनिराशबुद्धिविषयो यातो महद्गौरवम्।
तेनाद्यास्मि तुलान्यपादलसितो राशेर्बलादुन्नतः
ताराशंकरशर्म-भाग्यलिखितं को मार्जितुं सक्षमः ॥[38]

विपत्तिग्रस्ता जना अत्यधिकसतर्कतया कार्यं सम्पादयन्ति। अस्य निष्कर्षस्वरूपा उक्तिः— *'दूध का जला छाछ भी फूँक-फूँक कर पीता है'* इति प्रसिद्धा अस्ति। डॉ. राजेन्द्रप्रसादभट्टः *भूकम्पशतके* प्राकृतिकापदायाः चित्रणे इमां लोकोक्तिं निरूपितवान् यत् सामान्यभूकम्पनेऽपि भयभीताः नराः स्वगृहाद् बहिः पलायन्ति।

सामान्य - भूमिचलनं ह्यनुभूय लोका
धावन्ति दैव - हतकाश्च बहिः स्वगेहात्।
मन्ये यदुष्ण-पयसा परिदग्धलोक-
स्तक्रं शनैः पिबति निःश्वसनं विधाय ॥[39]

निकृष्टा नराः स्वाश्रयं प्रति कृतज्ञतां न ज्ञापयन्ति, अपितु तस्यावमाननां प्रदर्श्य निजाधारमेव नाशयन्ति। इति विषयमवलम्ब्य कृतघ्नतायाः परिचायिकाः लोकोक्तयः — *'जिस थाली में खाता है, उसी में छेद करता है'* और *'जिस डाल पर बैठा, उसी को काट दिया'* इत्यादयः सन्ति। आसां रुचिरं चित्रणं विधाय पं॰ दोतोलिया उल्लिखितवान् —

येषामन्नमदन्ति नीचपुरुषाश्छिन्दन्ति पात्रं हि तत्
नीडं चैव दहन्ति दुर्मतिनरा गृह्णन्ति यत्राश्रयम्।

[37] अभिनवनीतिशतकम् - 41
[38] आत्मालापकाव्यम्
[39] गुर्जरभूकम्पशतकम्

सिद्धिं प्राप्य वदन्ति मित्रपुरुषान् मे किं कृतं क्व कृतम्
एतान् पापपरायणान् वसुमते! मातः! कथं धारय ॥[40]

प्रायो दृश्यते यत् प्रमादवशीभूताः अलसाः जनाः स्वकर्तव्याद् विमुखाः भवन्ति तथा च करणीयानां कार्याणां विषये अद्य न, श्वः करिष्याम। श्वो न, परश्वः करिष्यामः इति चिन्तयन्ति। अस्मिन् विषये हिन्दीलोकोक्तिरियं कर्तव्यस्य जागरूकतां प्रतिपादयति —

काल कर सो आज कर आज कर सो अब।
पल में प्रलय होएगी बहुरि करेगा कब?

अस्याः लोकोक्त्याः भावार्थयुक्तः श्लोकोऽयं विद्यते —

न कश्चिदपि जानाति किं कस्य श्वो भविष्यति।
अतः श्वः करणीयानि कुर्यादद्यैव बुद्धिमान्॥

सर्वे मनुष्याः सम्मिल्य दुरूहं कार्यमपि साधयितुं शक्नुवन्ति, न तु पृथग्रूपेण। एवं सङ्घटितानां जनानां कठिनकार्यसम्पादनस्यापि सामर्थ्यं सिद्धम्। अतः सङ्घटनम् अमूल्यं भवतीति सन्दर्भे हिन्द्यामुच्यते — *'बँधी बुहारी लाख की, बिखरियाँ पाछ खाक की'*। अस्य सारांशयुक्ता लोकोक्तिः — *'संहतिः कार्यसाधिका'* तथा च *'संघे शक्तिः कलौ युगे'* इति द्विप्रकारिका वर्तते।

इत्थम् उपर्युक्तविवेचनेनानेन स्पष्टं जायते यत् सामान्यजनजीवने वार्तालापक्रमे प्रयुक्तानां नैकानां लोकोक्तीनां प्रयोगं प्राचीनाः आधुनिकाश्च संस्कृतसाहित्यकाराः स्वस्वकाव्येषु सहजतया सरसतया च कृतवन्तः। काश्चन लोकोक्तयः संस्कृतसाहित्यात् सांसारिकवार्तालापे प्रचलिताः तथा च काश्चिद् लोकजीवनाद् संस्कृतकाव्येषु प्रयुक्ता जाताः। मानवजीवनस्य विविधपक्षेष्वाधारितानां लोकोक्तीनां माध्यमेन समाजस्य व्यावहारिकतायाः सारभूतं ज्ञानं सञ्जायते। एवं पुरातनकालात् प्रचलिता लोकोक्तिपरम्परा आधुनिककालेऽपि दृश्यते।

## सन्दर्भग्रन्थसूची

1. दोतोलिया, पं० श्री रामस्वरूप (लेखक). (n.d.). *अभिनवनीतिशतकम्*. जयपुरः रचना प्रकाशन।
2. मिश्र, अभिराज राजेन्द्र (लेखक). (2009). *अभिनवपञ्चतन्त्रम्*. इलाहाबादः वैजयन्त प्रकाशन।
3. शर्मा पाण्डेय, मोहन लाल (लेखक). (1993). *रसकपूरम्*. जयपुरः पाण्डेय प्रकाशन।
4. भट्ट, डॉ राजेन्द्रप्रसाद (रचयिता). (2003). *गुर्जरभूकम्पशतकम्*. उज्जयिनी, मध्यप्रदेश।
5. शर्मा पाण्डेय, प्रो॰ ताराशंकर (रचयिता). (n.d.). *आत्मालापः (खण्ड काव्य)*. समय-समय पर भारती पत्रिका तथा फेसबुक पर प्रकाशित
6. शास्त्री, पं॰ नरेन्द्रकान्त (रचयिता) एवं शर्मा, प्रो॰ सुरेन्द्रकुमार (सम्पादक). (2012). *श्रीगोतमेश्वरशतकम्*. जयपुर, हंसा प्रकाशन।

[40] अभिनवनीतिशतकम् 59